श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

विल्लूर् नडादूर् श्री श्रीनिधेः कृतिषु

॥ गुरुवायुपुरीश मणिमङ्गळस्तवः ॥

This document has been prepared by

Sunder Kidāmbi

with the blessings of

श्री रङ्गरामानुज महादेशिकन्

His Holiness śrīmad āṇḍavan śrīraṅgam

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

॥ गुरुवायुपुरीश मणिमङ्गळस्तवः ॥

कविताजितकल्लोलिकन्यकाकान्तवक्षसे।
करुणादिगुणाढ्याय कमलानिधये नमः॥

गुरुवायुपुरीवास कुरुक्षेत्रीयसारथे।
गुरुचित्तकृतावास कुरु किञ्चित् कृपां मयि॥ 1 ॥

गुरुरुत गुरुवायुराञ्जनेयः
गुणकथने गुरुवायुभोजनो वा।
गुरुरयमहिमण्डलस्य नालं
तव गुरुवायुपुराधिनाथ कोऽहम्॥ 2 ॥

गुरुसदागतिपत्तननायकं
कुरु सदा हृदि सद्गतिदायिनम्।
मरुभुवीव भवे भगवानभूत्
उरु सुधेव सतां तपसा ह्ययम्॥ 3 ॥

वाचस्पतिस्सन् सततं गृहस्थः
सदागतिं चैति तमेनमाप्य।
वाचस्पतिं चापि सदागतिं यः
स्वपत्तनाख्यागतमातनोति॥ 4 ॥

तापजालपापजालशापजालपीडितः
जीवराशिरत्र नाम जीवनं यदीच्छति।

जीववायुपत्तनेन्द्रपादसेवनं विना
तस्य का नु भूतलेऽत्र विद्यते गतिः परा ॥ 5 ॥

गुर्वग्निमित्रपरिपूजनहीनमेनं
मां पापिनं निरयगामिनमत्र पातुम्।
गुर्वग्निमित्रपुरनाथ विना भवन्तं
नालं परः शरणमस्ति ततो गतस्त्वाम् ॥ 6 ॥

जीवसमीरणनगरवरान्तः
जीवनमेकं जगतां जयति।
जीव तदेतत् हृदि कुरुषे चेत्
जीवनमत्र परत्र च ते स्यात् ॥ 7 ॥

आनीते गुरुणा पुरात्र मरुता शेषाचले श्रीनिधिः
सर्वेषां सकलेप्सितानि वितरन् जागर्ति काले कलौ।
अस्मिन् श्रीगुरुणा पुरोऽथ मरुता संपूजितः श्रीनिधिः
सर्वेषां सुलभस्ततोऽपि सकलं संवाञ्छितं वर्षति ॥ 8 ॥

हनूमति प्रीतिमुपागतस्सन्
द्वेधा परः स्वाकृतिमादधानः।
गुर्वज्ञनादौ गुरुवायुपुर्याम्
इत्यस्ति सर्वान् परिपालयन्नः ॥ 9 ॥

धिषणसमीरणपत्तननायक
तावकशोभनपादपयोजम्।
मनसि मनागिव कलयितुमीहे
तत्कुरु तत्कुरु तदलं तदलम् ॥ 10 ॥

करुणाकरता तव किल महिता
मय्यपि पापिनि विततिं गमिता।
करुणाकरसुतमुखसरणेर्माम्
इति किल कविताविह्वतिं तनुषे॥ 11॥

मणिपादुकया मधुरं भगवन्
संयोज्य त्वं पादसरोजम्।
मम किल हृदये विह्वतिं तनुषे
मन्ये धन्यं मम चात्मानम्॥ 12॥

मणिपादुकया मम कन्यकया
मधुरं कञ्चन संयोज्य वरम्।
मम कुरु नन्दथुनर्तनरङ्गं
मानसमम्बुजलोचन शीघ्रम्॥ 13॥

गोदामस्यास्सहजां पूर्वां
दयया ह्येवं भगवन्नकरोः।
प्रार्थनया किं रक्षितुमिच्छन्
वर्णानेवं वाचयसि त्वम्॥ 14॥

उद्धवनयने नन्दथुबाष्पं
जनयति यत्ते सुन्दरवर्ष्म।
तन्मम नयनद्वन्द्वं नु कदा
द्रक्ष्यति भगवन् तद्वद किञ्चित्॥ 15॥

भगवन् भवतो मङ्गलमङ्गल -
विग्रहसेवाकुतुकी पूर्वम्।
आगामहहो मध्ये मार्गं
केन निवृत्तस्तं न हि जाने॥ 16॥

घटयसि वाञ्छितमस्य हि तत्तत्
दर्शनमेकं वितरसि न त्वम्।
तदपि च दास्यसि वितरणविद्धन्
प्रभुरिह रोद्धुं प्रकृतिं को वा? ॥ 17 ॥

प्रतिकृतिरनया भगवन् भवतः
दत्ता मधुरा भक्तजनेन।
किञ्चिदिवाहं चेतो नयने
तत्र निधाय प्राप्त सुखोऽस्मि ॥ 18 ॥

नालस्य मूलं चरणाङ्गुलिभ्यां
पद्मं प्रसूनं परपङ्कजेन।
गृह्णन् गृहीतं हृदयाम्बुजं नु
मदीयमावेदयसीति मन्ये ॥ 19 ॥

युक्तं तदेतत् हृदयाम्बुजे त्वां
नालं विधातुं विषयैकलोलः।
सोऽहं ततस्त्वं स्वयमेव गृह्णन्
अनुग्रहं कञ्चन सन्ततोषि ॥ 20 ॥

त्वया गृहीतेऽपि हृदम्बुजाते
कुर्वन्ति लीलां विषयाः कुतोऽत्र।
आधारहीना अपि नाम ते स्युः
त्वत्स्पृष्टदेशे महिमास्ति कापि ॥ 21 ॥

गुरुवायुपुरीनाथस्तुतिः श्रीनिधिना कृता।
गुरुणा भक्तिभारेण पठतां भवतु श्रियै ॥ 22 ॥

॥ इति गुरुवायुपुरीश मणिमङ्गळस्तवः समाप्तः ॥